CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

चौखम्भा राजसेवा ग्रन्थमाला
२९

श्रीमद्यामुनमुनिप्रणीतम्

आळवन्दारस्तोत्रम्

शालिग्रामस्तोत्रम्, रङ्गनाथाष्टकम्, श्रीमदच्युताष्टकम्

चौखम्भा ओरियन्टालिया
वाराणसी : : दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक

चौखम्भा ओरियन्टालिया

पो० आ० चौखम्भा, पो० बाक्स नं० ३२

गोकुल भवन, के. ३७/१०९, गोपाल मन्दिर लेन

वाराणसी–२२१००१ (भारत)

टेलीफोन : ६३०२२ टेलीग्राम : गोकुलोत्सव

शाखा—बंगलो रोड, ९ यू० बी० जवाहर नगर

दिल्ली–११०००७

© चौखम्भा ओरियन्टालिया

प्रथम संस्करण १९७८

मूल्य रु ~~[illegible]~~ 5/-

मुद्रक—श्रीगोकुल मुद्रणालय, गोपाल मन्दिर लेन, वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आळवन्दारस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगोन्द्रस्तं वन्दे यामुनाह्वयम् ॥ १ ॥
नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥ २ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नमो यामुनपादाब्जरेणुभिः पावितात्मने ।
विदिताखिलवेद्याय गुरवे त्रिदितात्मने ॥ ३ ॥
नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥ ४ ॥
तस्मै नमो मधुजिदङ्घ्रिसरोजतत्त्व-
ज्ञानानुरागमहिमातिशयान्तसीम्ने ।
नाथाय नाथ मुनयेऽत्र परत्र चापि
नित्यं यदीयचरणौ शरणं मदीयम् ॥ ५ ॥
भूयो नमोऽपरिमिताच्युतभक्तितत्त्व-
ज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकेऽवतीर्णपरमार्थसमग्रभक्ति-
योगाय नाथ मुनये यमिनां वराय ॥ ६ ॥
तत्त्वेन यश्चिदचिदीश्वरतत्स्वभाव-
भोगापवर्गतदुपायगतीरुदारः ।
सन्दर्शयन्निरमिमीत पुराणरत्नं
तस्मै नमो मुनिवराय पराशराय ॥ ७ ॥
माता पिता युवतयस्तनयो विभूति-
स्सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत्तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्
नस्मन्मनोरथपथः सकलः समेति ।
स्तोष्यामि नः कुलधनं कुलदैवतं
तत्पादारविन्दमरविन्दविलोचनस्य ॥ ९ ॥

तत्त्वेन यस्य महिमार्णवशीकराणुः
शक्यो न मातुमपि शर्वपितामहाद्यैः ।
कर्तुं तदीयमहिमस्तुतिमुद्यताय
मह्यं नमोऽस्तु कवये निरपत्रपाय ॥ १० ॥

यद्वा श्रमावधि यथामति वाप्यशक्तः
स्तौम्येवमेव खलु तेऽर्पित सदा स्तुवन्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः
को मज्जतोरणुकुलाचलयोर्विशेषः ॥ ११ ॥
किञ्चैष शक्त्यतिशयेन न तेऽनुकम्प्यः
स्तोतापि तु स्तुतिकृतेन परिश्रमेण ।
तत्र श्रमस्तु सुलभो मम मन्दबुद्धे-
रित्युद्यमोऽयमुचितो मम चाब्जनेत्र ॥ १२ ॥
नावेक्षसे यदि ततो भुवनान्यमूदि
नालं प्रभो भवितुमेव कुतः प्रवृत्तिः ।
एवं निसर्गसुहृदि त्वयि सर्वजन्तो
स्वामिन्न चित्रमिदमाश्रितवत्सलत्वम् ॥ १३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वाभाविकानवधि कातिशयेशितृत्वं
नारायण त्वयि न मृष्यति वैदिकः कः ।
ब्रह्मा शिवश्शतमखः परमस्वराडि-
त्येतेऽपि यस्य महिमार्णवविप्रुषस्ते ॥ १४ ॥

कः श्रीः श्रियः परमसत्त्वसमाश्रयः कः
कः पुण्डरीकनयनः पुरुषोत्तमः कः ।
कस्यायुतायुतशतैककलांशकांशे
विश्वं विचित्रचिदचित्प्रविभागवृत्तम् ॥ १५ ॥

वेदापहारगुरुपातकदैत्यपीडा-
द्यावद्विमोचनमहिष्ठफलप्रदानैः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोऽन्यः प्रजा पशुपतिः परिपाति कस्य-
पादोदकेन स शिवः स्वशिरोद्धतेन ॥ १६ ॥
कस्योदरे हरिविरिञ्चिमुखः प्रपञ्चः
को रक्षितीममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः
कः केन चैष परवानिति शक्यशङ्कः ॥ १७ ॥
त्वां शीलरूपचरितैः परमप्रकृष्ट-
सत्त्वेन सात्त्विकतया प्रबलैश्च शास्त्रैः ।
प्रख्यातदैवपरमार्थविदां मतैश्च
नैवासुरप्रकृतयः प्रभवन्ति बोद्धुम् ॥ १८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उल्लङ्घितत्रिविधसोमसमातिशायि
सम्भावनं तव परिव्रढिमस्वभावम् ।
मायाबलेन भवतापि निगूह्यमानं
पश्यन्ति केचिदनिशं त्वदनन्यभावाः ॥ १९ ॥

यदण्डमण्डान्तरगोचरं च यद्बहिश्चोत्तराण्यावरणानि यानि च ।
गुणाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः ॥२०॥

वशी वदान्यो गुणवानृजुः शुचिर्मृदुर्दयालुर्मधुरः स्थिरः समः ।
कृती कृतज्ञस्त्वमसि स्वभावतः समस्तकल्याणगुणामृतोदधिः २१

उपर्युपर्य्यब्जभुवोऽपि पूरुषान् प्रकल्प्यते ये शतमित्यनुक्रमात् ।
गिरस्त्वदेकैकगुणावधीप्सया सदा स्थिता नोद्यमतोऽतिशेरते २२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनादयः ।
भवन्ति लीलाविधयश्च वैदिकास्त्वदीयगम्भीरमनोऽनुसारिणः २३
नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूमये ।
नमो नमोऽनन्तमहाविभूतये नमो नमोऽनन्तदयैकसिन्धवे ।२४।
न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविन्दे ।
अकिञ्चनोऽनन्यगतिः शरण्यं त्वत्पादमूलं शरणं प्रपद्ये ॥२५॥
न निन्दितं कर्म तवस्ति लोके सहस्रशो यन्न मया व्यधायि ।
सोऽहं विपाकावसरे मुकुन्द क्रन्दामि सम्प्रत्यगतिस्तवाग्रे ॥२६॥
निमज्जतोनन्तभवार्णवान्तश्चिराय मे कूलमिवासि लब्धः ।
त्वयापि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः ॥२७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखम् ।
किन्तु त्वदग्रे शरणागतानां पराभवो नाथ न तेऽनुरूपः ॥२८॥
निरासकस्यापि न तावदुत्सहे महेश हातुं तव पादपङ्कजम् ।
रुषा निरस्तोऽपि शिशुः स्तनन्धयो न जातु मातुश्चरणौ जिहासति
तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति ।
स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरसं हि वीक्षते ॥३०॥
त्वदङ्घ्रिमुद्दिश्य कदापि केनचिद्यथा तथा वापि सकृत्कृतोऽञ्जलिः
तथैव मुष्णात्यशुभान्यशेषतः शुभानि पुष्णाति न जातु हीयते ३१
उदीर्णसंसारनवाशुशुक्षणिं क्षणेन निर्वाप्य परां च निर्वृतिम् ।
प्रयच्छति त्वच्चरणारुणाम्बुजद्वयाऽनुरागामृतसिन्धुशीकरः ॥३२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विलासविक्रान्तपरावरालयं नमस्यदार्तिक्षपणे कृतक्षणम् ।
धनं मदीयं तव पादपङ्कजं कदा नु साक्षात्करवाणि चक्षुषा ३३
कदा पुनः शङ्खरथाङ्गकल्पकध्वजारविन्दाङ्कुशवज्रलाञ्छनम् ।
त्रिविक्रमं त्वच्चरणाम्बुजद्वयं मदीयमुर्द्धानमलङ्करिष्यति ॥३४॥
विराजमानोज्ज्वलपीतवाससं स्मितातसीसूनसमामलञ्छविम ।
निमग्ननाभिं तनुमध्यमुल्लसद्विशालवक्षःस्थलशोभिलक्षणम् ३५
चक्रासतं ज्याकिणकर्कशैः शुभैश्चतुर्भिराजानुविलम्बिभिर्भुजैः ।
प्रियावतंसोत्पलकर्णभूषणश्रलथालकाबन्धविमर्दशंसिभिः ॥३६॥
उदग्रपीनांसविलम्बिकुण्डलालकावलीं बन्धुरकम्बुकन्धरम् ।
मूखश्रिया न्यक्कृतपूर्णनिर्मलामृतांशुबिम्बाम्बुरुहोज्ज्वलश्रियम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रबुद्धमुग्धाम्बुजचारुलोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरम् ।
शुचिस्मितं कोमलगण्डमुन्नसं ललाटपर्य्यन्तविलम्बितालकम् ३८
स्फुरत्किरीटाङ्गदहारकण्ठिकामणीन्द्रकाञ्चीगुणनूपुरादिभिः ।
रथाङ्गशङ्खासिगदाधनुर्वरैर्लसत्तुलस्या वनमालयोज्ज्वलम् ३९
चकर्थ यस्या भवनं भुजान्तरं तव प्रियं धाम यदीयजन्मभूः ।
जगत्समस्तं यदपाङ्गसंश्रयं यदर्थमम्भोधिरमन्थ्यबन्धि च ।४०।
स्वतश्चरूप्येण सदानुभूतयाप्यपूर्ववद्विस्मयमादधानया ।
गुणेन रूपेण विलासचेष्टितैः सदा तवैवोचितया तव श्रिया ।४१।
तया सहासीनमनन्तभोगिनि प्रकृष्टविज्ञानबलैकधामनि ।
फणामणिव्रातमयूखमण्डलप्रकाशमानोदरदिव्यधामनि ।।४२।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः ।
शरीरभेदैस्तव शेषतां गतं यथोचितं शेष इतीर्यते जनैः ॥४३॥
दासः सखा वाहनभासनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः ।
उपस्थितं तेन पुरो गरुत्मता त्वदङ्घ्रिसम्मर्दकिणाङ्कशोभिना ४४
त्वदीयभुक्तोज्झितशेषभोजिना त्वया विसृष्टात्मभरेण यद्यथा ।
प्रियेण सेनापतिना निवेदितस्तथानुजानन्तमुदारवीक्षणैः ॥३५॥
हताखिलक्लेशमलै स्वभावतः सदानुकूल्यैकरसैस्तवोचितैः ।
गृहीततत्तत्परिचारसाधनैर्निषेव्यमाणं सचिवैर्यथोचितम् ॥४६॥
अपूर्वनानारसभावनिर्भरप्रबुद्धया मुग्धविदग्धलीलया ।
क्षणाणुवत्क्षिप्तपरादिकालया प्रहर्षयन्तं महिषीं महाभुजम् ४७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अचिन्त्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतोदधिम् ।
श्रियः श्रियं भक्तजनैकजीवितं समर्थमापत्सखमर्थिकल्पकम् ४८
भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिःशेषमनोरथान्तरः ।
कदाहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितम् ४९

धिगशुचिमविनीतं निर्दयं मामलज्जं
परमपुरुष योऽहं योगिवर्याग्रगण्यैः ।
विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं
तव परिजनभावं कामये कामवृत्तः ॥ ५० ॥

अपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥५१॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अविवेकघनान्धदिङ्मुखे बहुधा सन्ततदुःखवर्षिणि ।
भगवन् भवदुर्दिने पथः स्खलितं मामवलोकयाच्युत ॥५२॥
न मृषा परमार्थमेव मे शृणु विज्ञापनमेकमग्रतः ।
यदि मे न दयिष्यसे ततो दयनीयस्तव नाथ दुर्लभः ॥५३॥
तदहं त्वदृते न नाथवान्मदृते त्वं दयनीयवान्न च ।
विधिनिर्मितमेतदन्वयं भगवन् पालय मां स्म जीहपः ॥५४॥
वपुरादिषु योऽपि कोऽपि वा गुणतोऽसानि यथा तथाविधः ।
तदहं तव पादपद्मयोरहमद्यैव मया समर्पितः ॥५५॥
मम नाथ यदस्थि योऽस्म्यहं सकलं तद्धि तवैव माधव ।
नियतः स्वमिति प्रप्रबुद्धधीरथवा किन्नु समर्पयामि ते ॥५६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अवबोधितवानिमां यथा मयि नित्यां भवदीयतां स्वयम् ।
कृपयैवमनन्यभोग्यतां भगवन् भक्तिमपि प्रयच्छ मे ॥५७॥

तव दास्यसुखैकसङ्गिनां भवनेष्वस्त्वपि कीटजन्म मे ।
इतरावसथेषु मा स्म भूदपि मे जन्म चतुर्मुखात्मना ॥५८॥

सकृत्त्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः ।
महात्मभिर्मामवलोक्यतां नय क्षणेऽपि ते यद्विरहोऽतिदुःसहः ५९

न देहं न प्राणान्न च सुखमशेषाभिलषितं
न चात्मानं नान्यत्किमपि तव शेषत्वविभवात् ।
बहिर्भूतं नाथ क्षणमपि सहे यातु शतधा
विनाशं तत्सत्यं मधुमथन विज्ञापनमिदम् ॥६०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुरुन्तस्यानादेरपरिहरणोयस्य महतो
विहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि ।
दयासिन्धो बन्धो निरवधिकवात्सल्यजलधे
तव स्मारं स्मारं गुणगणमितोच्छामि गतभीः ॥६१॥
अनिच्छन्नप्येवं यदि पुनरपींच्छन्निव रज-
स्तमश्छन्नच्छद्मस्तुतिवचनभङ्गौमरचयम् ।
तथापीत्थं रूपं वचनमवलम्ब्यापि कृपया
त्वमेवैवम्भूतं धरणिधर मे शिक्षय मनः ॥६२॥
पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृ-
त्त्वमेव त्वं मित्रं गुरुरपि गतिश्चासि जगताम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं
प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ॥६३॥
जनित्वाहं वंशे महति जगति ख्यातयशसां
शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् ।
निसर्गादेव त्वच्चरणकमलैकान्तमनसा-
मधोऽधः पापात्मा शरणद निमज्जामि तमसि ॥६४॥
अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः
कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः ।
नृशंसः पापिष्ठः कथमहमितो दुःखजलधे-
रपारादुत्तीर्णस्तव परिचरेयं चरणयोः ॥६५॥
रघुवर यदभूस्त्वं तादृशो वायसस्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रणत इति दयालुर्यस्य चैद्यस्य कृष्ण ।
प्रतिभवमपराद्धुर्मुग्धसायुज्यदोऽभू-
र्वद किमु पदमागस्तस्य तेऽस्ति क्षमायाः ॥६६॥

ननु प्रपन्नस्सकृदेव नाथ तवाहमस्मीति च याचमानः ।
तवानुकम्प्यः स्मरतः प्रतिज्ञां मदेकवर्ज्यं किमिदं व्रतं ते ॥६७॥

अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ॥६८॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥ ६९ ॥

इति श्रीयामुनार्यविरचितमाळवन्दारस्तोत्रं समाप्तम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शालिग्रामस्तोत्रम्

॥ श्रीगणेशाय नमः ॥

अस्य श्रीशालिग्रामस्तोत्रमन्त्रस्य श्रीभगवान् ऋषिः, नारायणो देवता, अनुष्टुप् छन्दः, श्रीशालिग्रामस्तोत्रमन्त्रजपे विनियोगः ।

युधिष्ठिर उवाच

श्रीदेवदेव देवेश देवतार्चनमुत्तमम् ।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥ १ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीभगवानुवाच

गण्डक्यां चोत्तरे तीरे गिरिराजस्य दक्षिणे ।
दशयोजनविस्तीर्णा महाक्षेत्रवसुन्धरा ॥ २ ॥

शालिग्रामो भवेद्देवो देवी द्वारावती भवेत् ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ३ ॥

शालिग्रामशिला यत्र यत्र द्वारावती शिला ।
उभयोः सङ्गमो यत्र मुक्तिस्तत्र न संशयः ॥ ४ ॥

आजन्मकृतपापानां प्रायश्चित्तं य इच्छति ।
शालिग्रामशिलावारि पापहारि नमोऽस्तु ते ॥ ५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥ ६ ॥
शङ्खमध्ये स्थितं तोयं भ्रमितं केशवोपरि ।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत् ॥ ७ ॥
स्नानोदकं पिबेन्नित्यं चक्राङ्कितशिलोद्भवम् ।
प्रक्षाल्य शुद्धं तत्तोयं ब्रह्महत्यां व्यपोहति ॥ ८ ॥
अग्निष्टोमसहस्राणि वाजपेयशतानि च ।
सम्यक् फलमवाप्नोति विष्णोर्नैवेद्यभक्षणात् ॥ ९ ॥
नैवेद्ययुक्तां तुलसीं च मिश्रितां विशेषतः पादजलेन विष्णोः ।
योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

खण्डिता स्फुटिता भिन्ना वह्निदग्धा तथैव च ।
शालिग्रामशिला यत्र तत्र दोषो न विद्यते ॥ ११ ॥
न मन्त्रं पूजनं नैव न तीर्थं न च भावना ।
न स्तुतिर्नोपचारश्च शालिग्रामशिलार्चने ॥ १२ ॥
ब्रह्महत्यादिकं पापं मनोवाक्कायसम्भवम् ।
शीघ्रं नश्यति तत्सर्वं शालिग्रामशिलार्चनात् ॥ १३ ॥
नानावर्णमयं चैव नानाभोगेन वेष्टितम् ।
तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ १४ ॥
नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा ।
तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् ॥ १५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृष्णे शिलातले यत्र सूक्ष्मं चक्रं च दृश्यते ।
सौभाग्यं सन्ततिं धत्ते सर्वसौख्यं ददाति च ॥ १६ ॥
वासुदेवस्य चिह्नानि दृष्ट्वा पापैः प्रमुच्यते ।
श्रीधरः सुकरे वामे हरिद्वर्णस्तु दृश्यते ॥ १७ ॥
वराहरूपिणं देवं कूर्माङ्कैरपि चिह्नितम् ।
गोपदं तत्र दृश्येत वाराहं वामनं तथा ॥ १८ ॥
पीतवर्णं तु देवानां रक्तवर्णं भयानकम् ।
नारसिंहोऽभवद्देवो मोक्षदं च प्रकीर्तितम् ॥ १९ ॥
शंङ्खचक्रगदाकूर्माः शङ्खो यत्र प्रदृश्यते ।
शङ्खवर्णस्य देवानां वामे देवस्य लक्षणम् ॥ २० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दामोदरं तथा स्थूलं मध्ये चक्रं प्रतिष्ठितम् ।
पूर्णद्वारेण सङ्कीर्णा पीतरेखा च दृश्यते ॥२१॥
छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः ।
कपटे च महादुःखं शूलाग्रे तु रणं ध्रुवम् ॥ २२ ॥
ललाटे शेषभोगस्तु शिरोपरि सुकाञ्चनम् ।
चक्रकाञ्चनवर्णानां वामदेवस्य लक्षणम् ॥ २३ ॥
वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिङ्गलम् ।
लक्ष्मीनृसिंहदेवानां पृथग्वर्णस्तु दृश्यते ॥ २४ ॥
लम्बोष्ठे च दरिद्रं स्यात्पिङ्गले हानिरेव च ।
लग्नचक्रे भवेद्व्याधिर्विदारे मरणं ध्रुवम् ॥ २५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पानोदकं च निर्माल्यं मस्तके धारयेत्सदा ।
विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रितम् ॥ २६ ॥
कल्पकोटिसहस्राणि वैकुण्ठे वसते सदा ।
शालिग्रामशिलाबिन्दुर्हत्याकोटिविनाशनः ॥ २७ ॥
तस्मात्संपूजयेद्ध्यात्वा पूजितं चापि सर्वदा ।
शालिग्रामशिलास्तोत्रं यः पठेच्च द्विजोत्तमः ॥ २८ ॥
स गच्छेन्परमं स्थानं यत्र लोकेश्वरो हरिः ।
सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥ २९ ॥
दशावतारा देवानां पृथग्वर्णस्तु दृश्यते ।
ईप्सितं लभते राज्यं विष्णुपूजामनुक्रमात् ॥ ३० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोट्यो हि ब्रह्महत्यानामगम्यागम्यकोटयः ।
ताः सर्वा नाशमायान्ति विष्णुनैवेद्यभक्षणात् ॥ ३६ ॥

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ।
तस्मादष्टगुणं पापं भूमौ बिन्दुनिपातनात् ॥ ३२ ॥

इति श्रीशालिग्रामस्तोत्रं संपूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रङ्गनाथाष्टकम्

॥ श्रीगणेशाय नमः ॥

पद्मादिराजे गरुडादिराजे विरिञ्चिराजे सुरराजराजे ।
त्रैलोक्यराजेऽखिलराजराजे श्रीरङ्गराजे नमता नमामि ॥१॥
श्रीचित्तशायी भुजगेन्द्रशायी नादार्कशायी फणिभोगशायी ।
अम्भोधिशायी वटपत्रशायी श्रीरङ्गराजे नमता नमामि ॥२॥
लक्ष्मीनिवासे जगतां निवासे हृत्पद्मवासे रविबिम्बवासे ।
शेषाद्रिवासेऽखिललोकवासे श्रीरङ्गवासे नमता नमामि ॥३॥
नीलाम्बुवर्णे भुजपूर्णकर्णे कर्णान्तनेत्रे कमलाकलत्रे ।
श्रीवल्लिरङ्गे जितमल्लरङ्गे श्रीरङ्गरङ्गे नमता नमामि ॥४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मादिवन्द्ये जगदेकवन्द्ये रङ्गे मुकुन्दे मुदितारविन्दे ।
गोविन्ददेवाखिलदेवदेवे श्रीरङ्गदेवे नमता नमामि ॥५॥

अतन्तरूपे निजबोधरूपे भक्तिस्वरूपे श्रुतिमूर्तिरूपे ।
श्रीकान्तिरूपे रमणीयरूपे श्रीरङ्गरूपे नमता नमामि ॥६॥

कर्मप्रमादे नरकप्रमादे भक्तिप्रमादे जगताधिगाधे ।
अदाथनाथे जगदेकनाथे श्रीरङ्गनाथे नमता नमामि ॥७॥

अमोघनिद्रे जगदेकनिद्रे विदेहनिद्रे विषयासमुद्रे ।
श्रीयोगनिद्रे सुखयोगनिद्रे श्रीरङ्गनिद्रे नमता नमामि ॥८॥

इति श्रीरङ्गनाथाष्टकं सम्पूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीमदच्युताष्टकम्

॥ श्रीगणेशाय नमः ॥

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे ॥१॥

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरामन्दिरं चेतसा सुन्दरं देवकीनन्दनं नन्दजं सन्दधे ॥२॥

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जानकीजानये।
वल्लभीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥३॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृष्ण गोविन्द हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४॥
राक्षसक्षोभितः सीतया शोभितो दण्डकारण्यभूपुण्यताकारणः ।
लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम्
धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः ।
पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥६॥

विद्युदुद्द्योतवान्प्रस्फुरद्वाससं
प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम् ।
वन्यया मालया शोभितोरःस्थलं
लोहितांघ्रिद्वयं वारिजाक्षं भजे ॥ ७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुञ्चितैः कुन्तलैर्भ्राजमाननं
रत्नमौलिं लसत्कुण्डलं गण्डयोः ।
हारकेयूरकं कङ्कणप्रोज्ज्वलं
किङ्किणीमञ्जुलं श्यामलं तं भजे ॥ ८ ॥

अच्युतस्याष्टकं यः पठेदिष्टदं
प्रेमतः प्रत्यहं पूरुषः सस्पृहम् ।
वृत्ततः सुन्दरं कर्तृ विश्वम्भरं
तस्य वश्यो हरिर्जायते सत्वरम् ॥ ९ ॥

श्रीशङ्कराचार्यविरचितमच्युताष्टकं सम्पूर्णम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तोत्रग्रन्थाः

१ शुक्लयजुर्वेदीयरुद्राष्टाध्यायी (कर्मकाण्ड)। शिवापराधक्षमापनस्तोत्रम्, शिवपञ्चाक्षरस्तोत्रम् तथा शिवषडक्षरस्तोत्रसहितम्। सम्पादक—आचार्य ऋषिशङ्कर अग्निहोत्री १—५०

२ शिवमहिम्नस्तोत्रम्। शिवताण्डवस्तोत्रं, द्वादशज्योतिर्लिङ्गस्तोत्रं, शिवपञ्चाक्षरस्तोत्रं तथा शिवषडक्षरस्तोत्रसहितञ्च ०—७५

३ शिवमहिम्नस्तोत्रम्। अन्वय-हिन्दी तथा अंग्रेजी भाषान्तर के सहित। व्याख्याकार—लक्ष्मीनारायण ओंकारलाल जोशी २—५०

४ शिवमहिम्नस्तोत्रम्।—हिन्दी भाषान्तर सहित। व्याख्याकार—लक्ष्मी नारायण ओंकारलाल जोशी १—००

५ अर्धनारीश्वरस्तोत्रम्। अर्धनारीश्वरस्तुति, श्रीमदर्धनारीश्वराष्टोत्तरशतनामावलिसहितञ्च ०—७५

६ रामरक्षास्तोत्रम्। श्रीबुधकौशिकविरचितम् ०—३०

७ ऋणमोचनमङ्गलस्तोत्रम् ०—२०

८ दक्षिणामूर्तिस्तोत्रम्। श्रीशङ्कराचार्यविरचितम् ०—२०

प्राप्तिस्थान—चौखम्भा ओरियन्टालिया, वाराणसी, दिल्ली

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति

आळवन्दारस्तोत्रम्

समाप्तम्

अन्य प्राप्तिस्थान—

चौखम्भा विश्वभारती

चौक (चित्रा सिनेमा के सामने)

वाराणसी–२२१००१

फोन : ६५४४४